१०६
―
७

106
―
7

अथ

ग्रन्थनामः-	पूर्व "मीमांसाभाष्यम्"	
कर्तृनामः-	"शबरस्वामी"	
विषयः-	'मीमांसा'	

Purva Mimasa Bhasyam.

813

१०६
―
७

अथ

मीमांसाभाष्यम्

१०५
७

मीमांसाभाष्यनवमाध्यायपत्रा ॥ ८० ग्रंथ २२२५ ॥ ३ ॥ ९

[redacted]

106
7

शबरस्वामिप्रणीतम्

॥श्रीगणेशाय नमः॥ यस्तु कर्म्मप्रधानं तद्द्वितीयेनार्हतां तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात्॥ ॥अथ
प्रथमाध्याये विशेषातिदेशलक्षणं वृत्तं। ऊह इदानीं ऊहलक्षणं वर्त्तयिष्यामः॥ त्रिविध ऊहः॥ मंत्रसामसंस्कारविष
यः॥ स ऊहः प्राधान्येन वक्ष्यते। अन्यदपि किंचिदुपोद्घातेन प्रसंगेन च। आदितस्तावयमर्थश्चिंत्यते लक्षणसिद्ध्यर्थं।
अग्निहोत्रं चरुर्दर्शपूर्णमासौ ज्योतिष्टोमश्चोदाहरणं। तत्र पृथक् धर्म्माः समाम्नाताः। तेषु संशयः। किं ते अपूर्वप्र
युक्ताः उत यजिप्रयुक्ता इति। अपूर्वप्रयुक्तेषु सत्सु ऊहः सिध्यति। यजिप्रयुक्तेषु तु संकरो धर्माणां। कथमिव। सर्वे हि ते य
जतयः। यजतिसामान्येन यजतिशब्दवाच्ये धर्म्मा विधीयमानाः सर्वत्र भवितुमर्हंति। अपूर्वप्रयुक्तत्वे तु तदीयवि
शेषे विधीयमानात्तत्रास्मिन्नपि तदीयविशेषाणां न भविष्यंतीति तस्मात्तत्रोहः सिद्धो भवति। नन्वेतत्सर्वं सप्तमे विचा
रितं। निर्णीतं च। उच्यते। पुनस्तदेव स्मार्यते। उत्तरचिंतां विवक्षया। अथवा तत्र योऽर्थो नोक्तस्तं विवक्षयेदमुच्यते।
दृष्टासौ। तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वादिति। एतेन च ऊहप्रयोजनमूहं विवक्षता। एवं हि स सिध्यति॥ तत्रैतत्स्यो राम
दं। नैतेन तत्र प्रयोजनमिति। तत्र हेतावतीस्थिता। किंप्रति प्रकरणं नियता धर्म्मा उत सर्वे सर्वत्रेति। इदं पूर्वप १
त

युक्तत्वे यजिप्रयुक्तत्वे वा सिद्ध्यति न द्रव्यसंस्कारस्य। पूर्वार्थत्वे तत्त्विह सिद्धं तत्रापूर्वप्रयुक्तत्वसिद्धौ व्यवहार
र्थमस्य चिंतनमुपादीयते। तस्मादपुनरुक्तं। अथवान्यामेव चिंतामिह वक्ष्यामः। किं यजिनिमित्ता धर्म्मा अपूर्वप्र
युक्ताः। उतापूर्वनिमित्ता अपूर्वप्रयुक्ताश्चेति। इदानीं तु यजिप्रयुक्ता अपूर्वप्रयुक्ता वेति चिंत्यते। किं तावत्प्रा
प्तं। यजिप्रयुक्ता इति। कुतः। यजिशब्देन हि कर्त्तव्यतायामभिसंबंधात्। एवं यागं कुर्यात्। एवं यागेन कुर्वीत। इति
एवं प्राप्ते ब्रूमः। यजर्थस्य यत्कार्यं तत्प्रधानं तद्धि कर्त्तव्यतया बोध्यते। यच्च कर्त्तव्यतान्तैर्वेति कर्त्तव्यता। अथ य
दुक्तं यजतिशब्देनाभिसंयोगो धर्म्माणामिति तदुच्यते। तस्य द्रव्येषु यजतौ वा यः संस्कारः स तत्प्रयुक्तः। अपूर्वप्रयु
क्तेः। तदर्थत्वाद्यजतेः॥ द्रव्याणां तु तद्दीयत्वेन धर्मैरभिसंबंधः। न स्वेनात्मना। नहि धात्वर्थस्य च धर्म्माणां सं
रस्पर्शेण कांक्षा विद्यते। प्रत्ययार्थेन हीति कर्त्तव्यताकांक्ष्यते। कर्त्तव्यं कृप्यमिति। नेयजिः कीदृक्षा इति। तस्मा
द्यत्कर्त्तव्यं तस्यैवेति कर्त्तव्यतया संबंधः। अपूर्वं च तत्र। तस्मादपूर्वप्रयुक्ता इति॥ एवं वा॥ एते षड्वोदाहरणाभ
वंति चिंत्यते। किं यजिनिमित्ता धर्मा अपूर्वप्रयुक्ता उतापूर्वप्रयोजकं निमित्तं त्वेवेति। किं प्राप्तं। यजिर्निमित्तं पूर्वप्र

२ योजकमिति। कुतः। नैष्कस्य प्रयोजकत्वं निमित्तभावश्चोपपद्यते। यदर्थं हि क्रियन्ते धर्मास्तत्प्रयोजकं यस्मिन्स
ति क्रियन्ते तन्निमित्तं। न चैकस्मिन्नुभावेवापूर्वे भवतीति विप्रतिषिद्धत्वात्। अन्यादिवचनव्यक्तिरपूर्वार्थेषु। अन्या
वापूर्वं प्रतीति। यन्निमित्तत्वे तत्राद्येव कल्पते। एवं यागेन कुर्यादिति यागे सत्यपूर्वस्योपकारकाणि अस
त्यनुपकारकाण्यंगानीति तस्माद्यद्गिन्निमित्तमपूर्वं तत्प्रयोजकमिति॥ एवं प्राप्ते ब्रूमः॥ यत्रकर्मप्रधानं यत्रते
कार्यं तद्धि फलवत्क्रियते। तदीयेषु द्रव्येषु यजतेरन्वयः संस्कारः सोऽपूर्वप्रयुक्तः तदर्थास्त इति कृत्वा क्रियन्ते। न यज्ञ
र्थेन तेषामभिसंबंधः। प्रयोगवचनेनैते प्रत्ययार्थेन संबध्यन्ते। न हि साकांक्षो धात्वर्थः तस्मादपूर्वप्रयुक्ताः
अपूर्वनिमित्ताश्चाय उक्तं। अपूर्वस्य प्रयोजकत्वं निमित्तभावश्चानोपपद्यते। वचनव्यक्तिभेदादिति। तत्रोच्यते॥
प्रयोजकत्वं वा वानिक्तं। निमित्तभावश्च नैव वचनाद्भविष्यतीति। यद्धि येन प्रयुज्यते भवति तत्तस्य निमित्तं यथा
रामपोषकस्यारामो वेतनदाने प्रयोजको निमित्तं च। आरामे सति तस्मै वेतनं दीयते। वेतनसंबंधेन चा राम
रामं रक्षितं। तस्माद्धर्माणामपूर्वमेव प्रयोजकं निमित्तं चेति। संस्कारे युज्यमानानां तादर्थ्यात्तत्प्रयुक्तं स्यात् तादर् २

र्शपूर्णमासौ प्रतिसमामनंति प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहंति। प्रोक्षिताभ्यां पिनष्टि इति। तत्र
समर्थः सांशयिकः। किं प्रोक्षणं हंतिपिषिप्रयुक्तमुतापूर्वप्रयुक्तमिति किं प्राप्तं संस्कारे हंतिपिष्याख्यप्रयुज्या
मानस्य प्रोक्षणस्यातत्प्रयुक्तता स्यात्संस्कारप्रयुक्तं। संसंस्कारो हि हंतिपिषिभ्यां कृत एतत्प्रयुक्ततेति। तादर्थ्या
न्। यद्धि येन कर्तव्यं भवति तत्तस्य प्रयोजकं। यच्च पूर्वमनेन क्रियते तत्तस्यापूर्वं प्रयोजकं। यदि हंतिपिषीत
नस्तौ प्रयोजकौ प्रकरणाच्चापूर्वं कर्तव्यं गम्यते। वाक्याद्धंतिपिषी। वाक्यं च प्रकरणाद्बलीय इति। ननु हंतिपि
ष्योः क्रियमाणमपूर्वार्थं भविष्यति तच्च प्रकरणं च वाक्यं चोभयमप्यनुग्रहीष्यते। उच्यते। न शक्यमुभयमनु प्र ६
ग्रहीतुं। न प्रकरणसमाम्नायमात्रेण प्रकरणाद्वर्तोऽर्थे न समाम्नातमिति गम्यते। प्रकरणसमाम्नानादप्र
सक्ते नैकवाक्यता भवति ततस्तादर्थ्यमवगम्यते। इह तु प्रत्यक्षाभ्यां हंतिपिषिभ्यां प्रोक्षणस्यैकवाक्यता सा।
प्रसक्ते नैकवाक्यतां परो द्वौ बाधेते। न च ताभ्यां विसदृशैकवाक्यता स्यात्। यद्येकेनैकवाक्यता तदा नेनानि दे २
वाक्योक्तस्य नान्येनाप्येकवाक्यता कल्पते। तस्मात्प्रसक्ते नैकवाक्यताभावात्तेनापूर्वार्थं प्रोक्षणमाहान

म.न. न्तु हंति पिषी अपूर्वार्थौ तदर्थं च प्रोक्षणं तस्मादपूर्वस्योपकारकमिति। उच्यते भवति प्रनाद्योपकारकं न त्वपूर्वप्रयु
२ क्तं द्विविधं ह्यंगं च अंगस्योपकारकं भवति। किंचिदपूर्वस्यैतदंगं विशिष्टमित्यनेन कारणेनांगेन संबध्यते। किंचिदन
पेक्ष्यैवापूर्वसंबंधं स्वरूपेणैव कारणेन संबध्यते। यदपूर्वसंबंधं कारणत्वेनोपादाय धर्म्मजातमंगविशेषेण
संबध्यते तदपूर्वप्रयुक्तं भवति। ताहृत्रां च विद्यताव र्थातिरेकत्का यपि न्वेऊहितयं भवति। यत्र पुनः स्वरूपमंगस्य धर्म्मे न
संबंधे कारणं भवति तत्स्वरूपप्रयुक्तं। तत्र यद्यपि तेन धर्म्मेण तापूर्वसाध्यते तत्र साध्यमानमपूर्वेन धर्म्मी
स्य प्रयोगहेतुभूतं भवति न तत्प्रयोजकं तस्य स्वरूपं विघतत्तेन धर्म्मः प्रयुज्यते। तत्र वितताव र्थातिरेकरूपा भावा
द्धेतो नावकल्प्यते। एवं सति वाक्यान्निर्णयः यदि कार्यमपूर्वस्य कारणं तावद्दतितताऽपूर्वप्रयुक्तं मथांगस्य ततोगप्र
युक्तौ तत्रोक्तं प्रकरणादपूर्वप्रयुक्तं स्याद्वाक्यात् लिंगप्रयुक्तेति। तस्माद्धंति पिषिप्रयुक्तं प्रोक्षणमिति यत्र यत्र हंति पिषी
प्रयुज्येते तत्र तत्रैवं धर्म्मको भवत इति॥ ॥तेन त्वर्थे नयत्नस्य संयोगात धर्म्मसंबंधस्तस्माद्यत्प्रयुक्तं स्या। तं स्व राम
रस्य तदर्थत्वात्। तत्राह्नः पक्षं यावत्तेपति। न त्वेतौस्ति। इति पिषिप्रयुक्ते प्रोक्षणमिति। तेन त्वर्थे न हंति नापि पिषिणा व ३

यस्मादपूर्वस्य संयोगस्तस्मात्तस्य प्रोक्षणसंबंधः॥ अपूर्वसाधनविशेषकारितः प्रोक्षणसंस्कारेण संबंधः
न हंतिपिषिकारितः। कथं निःप्रयोजनौ हंतिपिषी यदि तत्प्रयुक्तं प्रोक्षणं तदपि निःप्रयोजनमतो न तत्प्रयुक्तं। आ
ह। अपूर्वस्योपकारकौ हंतिपिषी न निःप्रयोजनाविति। उच्यते। न प्रोक्षणस्यापूर्वस्य कश्चिदस्ति संबंधः। यदि प्रो
क्षणं न क्रियते न हंतिपिषी अपूर्वस्य साधनभावं न गच्छतः। तस्माद्यद्यपि हंतिपिषी अपूर्वस्योपकारकौ तथापि ताभ्यां
संबध्यमानं प्रोक्षणमनर्थकमेव। अथोच्येत॥ यदर्थं हंतिपिषी उपादीयेते तत्प्रोक्षणेन संबध्येत। अतः कर्तुं नान्यथेति।
उच्यते। नैवंजातीयकः शास्त्रेऽस्तीति न चाह॥ अयमेव वक्राह एतमर्थमभिवदतीति। कथं प्रोक्षिताभ्यामवहंतिप्रोक्षिता
भ्यामपि न पिष्टिरिति यद्धंतिपिषिभ्यां क्रियते तत्प्रोक्षणसंबंधाभ्यामिति हंतिपिषिकार्येण प्रोक्षणं संबध्यते। न ताभ्यामिति। उच्य
नैतदेवं। यदि यद्धंतिपिषिभ्यां क्रियते तत्प्रोक्षणेनाभिसंबध्यते। संबंध एव प्रोक्षणस्य न स्यात्। तद्धिताभ्यामभिनिर्वर्त्यते। कि
मपरं तत्प्रोक्षणमभिनिवर्त्यते। अथ प्रोक्षिताभ्यामपूर्वं पूर्वं क्रियते इत्यस्ति संबंधः। न तर्हि हंतिना पिषिणा वा॥ अथ तत्सं
बंधोऽपि उत्पद्यते। अनेकसंबंधे वाक्यं भिद्येत। तस्माद्धंतिपिषिभ्यां प्रोक्षणं संबध्यमानमप्रयोजनमिति प्रकरणादप

रा०७
४

वैणसंबध्यते। नन्वेवं हंतिप्रोक्षिसंबंधोनावकल्पेत। अत्र कल्पिष्यत इति ब्रूमः। कथमिहावघातं प्रति यत्नमान
स्यक्षर्यं निष्पद्यते अवहंतिरूपं तंडुलनिर्वृत्तिश्चाप्रोक्षणाद्याश्चापूर्वभावना विशेषः। तंडुलनिर्वृत्तिरप्यपूर्वोपकारः। सोवहं
तिक्रियया विशिष्टतः। तेन प्रोक्षणस्य संबंधः। यद्यप्यवहंतिरूपेण संबध्यमाने प्रोक्षणेऽकृतासंबंधो भवति तथा
पितत्रनिः प्रयोजनत्वाल्लक्षणैवाश्रीयते। लक्षणा हि प्रसक्ता सा। अदृष्टकल्पनायाज्यायसी। न चैवं हंतिरार
दुपकारकोपूर्वनिःपादयति। दृष्टमुपकारं कुर्वन्नादृष्टं न सामर्थ्येन समीचीनं करोतीति गम्यते। यद्यपि वनिष्पाद
यंत्तथाप्युपकारेण संबध्यमानं प्रोक्षणं केवलावहंतिसंबंधेना नर्थकमेवस्यात्। अतोवहंतिलक्षितेनोपका
राम रविशेषेणास्य संबंधः। तस्मादनवहंतिरपि पर्यवायीपन्नसन्नचप्रोक्षणं भवत्येव यथा नखनिर्भिन्ने चरौ नखेषु
तस्मादपूर्वप्रयुक्तएवंजातीयको धर्म इति॥ ॥ एवं वा। अस्तिज्योतिष्टोमस्तत्रेदं समाम्नायते। यावत्या वा वाक्कामि
यते तावत्या दीक्षणीयायामनुब्रूयात्। तमंद्रप्रायणीयायां मंद्रतरमातिथ्यायामुपांशूपसत्स्विति। तत्रायमर्थः। सांत्रा राम
पिकः किं परमापूर्वप्रयुक्ता एते धर्मा उत दीक्षणीयाद्यपूर्वप्रयुक्ता इति किं प्राप्तं। परमापूर्वसंस्कारे दीक्षणीयाद्यपूर्वे ४

युज्यमानस्याप्यधर्मस्य परमापूर्वार्थत्वाद्दीक्षणीयादीनां परमापूर्वार्थत्वं स्यात्। परमापूर्वं हि फलवत्।
यत्कर्तव्यतयाभिसंबध्यते तद्धर्मैरभिसंबध्यते। नांगापूर्वं निःप्रयोजनं हि तदिति॥ ॥तेन त्वर्थेन यज्ञस्य संयो
गाद्धर्मसंबंधस्तस्माद्यज्ञप्रयुक्तं स्यात्संस्कारस्य तदर्थत्वात्॥ तेन त्वर्थेन दीक्षणीयादिना यस्मात्परमापूर्वस्य सं
बंधस्तस्मात्परमापूर्वमेवंजातीयकेन धर्मेण धर्मवत्। तस्माद्यज्ञप्रयुक्तमेवंजातीयकं धर्मजातं तथा[illegible]तिः
त्राद्धेभवति उत्तरस्मिन्नपि लक्षणं स्यात्। न च प्रायणीयाद्यपूर्वं निःप्रयोजनं ज्योतिष्टोमस्य हि तदुपकारकं न च त
द्विना एवंजातीयकेन धर्मेण प्रायणीयाद्यपूर्वं सिद्धमेव हंति पिष्टवत्। यदुच्यते। विनैव धर्मेण तदपूर्वं निष्पत्ति।
तत्र उक्तः। तदपि यदपूर्वं शब्दादेवावगम्यते सोऽपि प्राकृताच्छब्दान्न प्रमाणान्तरेणोपसंख्यायते। एवंजातीय
केन शब्दप्रमाणकेनैवच्छेद्यो हि तदस्मात्प्रमाणं शब्दः प्रायणीयाद्यपूर्वस्योपकारकमिमं धर्ममाह।
न परमापूर्वस्य वचनप्रामाण्यात्। एवं चापरमापूर्वं निष्पन्नेऽरज्जस्य विनाशि चावाच्य धर्मः प्रतिष्ठितो न पर
मापूर्वं संक्रमिष्यति। एवमपि प्रयोजनसामर्थ्यं तस्मादेवंजातीयकं धर्मजातमगापूर्वप्रयुक्तमेवेति

किंमदतिप्रयोजनं इतरस्मिन्निनरस्मिन्वापक्षइति। उच्यते। अत्रेमे ये समाम्नायन्ते त्रैयातवीयादीष्टयो
५ याभवदानीति यदि परमार्थं प्रयुक्ता एवं जातीयको धर्म्मो तैस्तु तस्तस्योपकारविशेषे निवद्धइति तत्कार्यापन्नाये
त्रैयातवीयायां भविष्यति॥ अथास्मा। वैमृधस्य पूर्वं प्रयुक्तः ततो नेदमाग्नावैमृधामिति तत्रैयातव्याः पूर्वं न तेन नेय
धर्मेणसंमंत्स्यतइति॥ ॥फलदेवताधिकरणं॥ दर्शपूर्णमासौस्तः। दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेति।
तत्रफलसंबंधोधर्म्मोदेवतासंबंधश्च श्रूयते। फलसंबंधस्तावत् अगन्मस्वः संज्योतिषाभूमेति दैवतासंबंधो
पि अग्नेरुज्जितिमनूज्जेषं सोमस्योज्जितिमनूज्जेषमित्यादिः॥ तत्रसंशयः। किंस्वर्गसंबद्धस्य कर्मणः स्वर्गएव
प्रयोजकः॥ अग्न्यादिसंबंधस्यापारदयएव। उतोभयत्रापि कर्म पूर्वंप्रयोजकमिति। यद्येवमभिसंबंधः क्रिय
ते। गताः स्मः स्वर्गं अग्न्यादीनां वोज्जितिमनूज्जेषमिति ततः स्वर्गाग्न्यादिप्रयुक्तः अथैवं क्रियते। आगता दर्श
पूर्णमासफलं दर्शपूर्णमासदेवताया ग्नोज्जितिमनूज्जेषमिति ततो पूर्वप्रयुक्तः। किंप्राप्तं स्वर्गाग्न्यादिप्र राम
युक्तइति। कुतो मंत्राम्नानसामर्थ्यात्। यस्यमंत्रोवाचकः सइह वदितव्यइति गम्यते। अत्रोपावस्वर्गाग्न्यादीनां वा ५

वक्तो मंत्रः॥ तद्ब्राह्मणयार्द्दर्शपूर्णमासफलदेवतयोस्तस्माघन्फलदेवतमितिसमधिगतंस्वर्गाग्न्यादित्तत्व
सुक्तोधर्म्मः स्यादिति॥ ॥नचोदनातोहिंसाकुण्डं॥ नैतदस्तिस्वर्गाग्न्यादिप्रयुक्तरमिवोदनातस्माकुण्डंस्मा
तः यत्फलवज्ञोघतेतदितिकर्त्तव्यतयान्वेमते। अपूर्ववफलवत्॥ नस्वर्ग्गाग्न्यादितरर्थेवचनंसंदृष्टार्थक
त्स्येतालब्राह्मणयाऽपूर्वंवफलदेवतावचनोदृष्टोर्थः स्यात्प्रोत्साहनात्। एतस्मिन्पक्षांतरदृष्टेसतिनस्वर्गाग्न्यादिव ८
वनस्यापूर्वस्यफलनान्माय्यात्राहार्थस्यवफलदेवतात्वेनसंप्रतिपन्नत्वात्लब्राह्मणत्वदुष्टा। तस्मादपूर्वप्रयुक्तम्
वजातीयकोधर्म्मइति। किंभवतिविचारस्यप्रयोजनं यथापूर्वःपक्षः सोयंकर्मणिअविकारेणमंत्रःप्रयोक्तव्यः॥
यथातर्हिसिद्धांतः ऊहनचगकम्नत्सवन्नेसंसूर्यस्यजूतिमन्त्रेषमितिफलपर्यवसितं। देवतायामुत्तराविंतावश्चि
ष्यते॥ ॥देवतावाप्रयोजयेदतिथिवत्भोजनस्यतदर्थत्वात्। नचैतदस्ति। अग्न्यादयोप्रयोजकाइति। सर्वेदेव
ताः सर्वेषांधर्माणांप्रयोजिकाभवितुमर्हंति। कुतः भोजनस्यतदर्थत्वात्। भोजनंहीदंदेवतायाः। यागोनामभो
ज्यद्रव्यंदेवतायैप्रदीयतेसाभोजनइति। देवतासंप्रदानकोह्ययंयागः श्रूयते। संप्रदानंचनामकर्म्मणेपीप्सि

तत्तमादभिप्रेततरं। तस्मान्न गुणभूता देवतां देवतां प्रति गुणभूते द्रव्यकर्म्मणी। अपि च यागो नाम देवतापूजा।
पूजा च पूजनीयं प्रति गुणभूता लोके दृश्यते। तदेतदतिथिवद्द्रष्टव्यं। यथा यावत्किंचिदतिथेः परिचरणं सर्वं तद
तिथिप्रयुक्तमेवमिदमपीति। आह। नन्वेवं ब्रुवता विग्रहवती देवता हविर्भुंक्ते चेत्यभ्युपगतं भवति। उच्यते बाढं विग्रहव
ती देवता भुंक्ते च। कुतः स्मृतेरुपचारादन्यार्थदर्शनाच्च। एवं हि स्मरंति विग्रहवती देवतेति। स्मृतिश्च नः प्रमा
णं तथा विग्रहवंती देवतामुपचरंति। यमं दंडहस्तमालिखंति कथयंति च। तथा वरुणं पाशहस्तमिंद्रं वज्रहस्तं। उ
पचारादपि स्मृतेर्दृढिमानं कल्पयामः। तथान्यार्थदर्शनं विग्रहवतीं देवतां दर्शयति। गृभ्णामि ते दक्षिणमिंद्र हस्त
मिति। पुरुषविग्रहस्य हि दक्षिणः सव्यश्च हस्तो भवति। तथा इमे चिदिंद्र रोदसी अपारे यत्संगृभ्णा मघवन्काशि
रित्ते इति काशिर्मुष्टिः सोपि पुरुषविग्रहस्यैवोपपद्यते। तथा तुविग्रीवो वपोदरः सुबाहुरंधसो मदे। इंद्रो वृत्राणि
जिघ्नत इति ग्रीवा उदरं बाहू इति पुरुषविग्रहदर्शनं भवति। तस्माद्विग्रहवती देवतेति भुंक्ते च। कथमवगम्यते स्मृ राम
तेरुपचारात् अन्यार्थदर्शनाच्च। एवं स्मरंति भुंक्ते देवतेति। तथा चैनां भुंजानामिवोपचरंति यदस्यै विविधमनुप्र। ६

गन्तुपहरंति तथा चान्यार्थवचनं भुंजानो देवतां गमयति। अद्धीद्र पिब च प्रस्थितस्येति। तथा न विश्वासेनानिज
ठरे सुवत्त इति। एकया प्रतिधापिबत्साकं सरांसि त्रिंशतमिति। आह। न देवता भुंक्ते। यदि च भुंजीत देवतायै हविः
प्रत्तं दीयेत। उच्यते। अन्नरसभोजिनी देवता मधुकरीवद् दृश्यते। कथं देवतायै हविः प्रत्तं नीरसं भवति। तस्मा
दन्नरसं भुंक्ते देवतेति गम्यते। अथपत्नाशा॥ यदि कस्य विदधसे ज्ञाना देवता उपवर्यमाणा वप्रसीदति। तत्तस्माद
राधनार्थमियं देवता पूज्यमाना विवर्धते न चैतदुभयमप्यस्तीति। तदुच्यते। अर्थपतिर्देवतेति। कथमवगम्यते स्मृते रूपव
दास्यार्थदर्शनाच्च। एवं हि स्मरंति। अर्थानामीष्टे देवतेति तथा देवयामो देवदेवत्र मित्युपचारः। तस्मिन्न वस्थितिं
उच्यति। तथान्यार्थवचनमीशानं देवतां दर्शयति। इंद्रो दिव इंद्र ईशे पृथिव्या इंद्रो अपामिंद्र इत्पर्वतानां इंद्रो वृधामिं
द्र इन्मेधिराणामिंद्रः क्षेमयोगे हव्य इंद्र इति तथा ईशानमस्य जगतः स्वर्दृशमीशानमिंद्र तस्थुष इति तथास्म त्सुपर
राम्पो प्रसीदती लुपगच्छामः। एवं हि स्मरंति प्रसीदति देवतेति तथोपचरंति प्रसन्नोस्य पशुपतिः। पुत्रोस्य जातः।
प्रसन्नोस्य चैत्रवणो धनमनेन लब्धमिति। तथान्यार्थदर्शनं भवति आहुतिभिरिज्यमाना देवान् प्रीणातीति त

न. ७ स्मै प्रीता उषं ऊर्जं नियच्छंतीति ॥ ततश्चैतेन संबंधः ॥ ततो देवतायास्तेन फलेन संबंधः परिवृत्तो भवति। यो देवतामि
ज्यया परिचरति तं सा फलेन संबध्नाति। कथमेतदवगम्यते। स्मृत्युपचारात्। मां स्मरतीति हि। देवता यष्टुः फलं ददातीति न
मे चोपचारो मां स्मरति इढयति। पश्चुपतिरनेनोपचरितः पुत्रोनेन लब्ध इति। तथान्यार्थदर्शनं अमुमेवार्थं दर्शयति।
सकृत्जनेन सवित्रा सततं नाम सुपुत्रैर्वाजिनं रवेयन्नास्तुभिः देवतानाथः पितरमाविवासति श्रद्धामना हविषा बृह
स्पतिमिति। तथा तस्मा एवैनमिंद्रः प्रजया पशुभिः तर्पयतीति तस्माद्विधिनेन गुणवचनेन देवताराध्यते स
प्रीता सती फलं प्रयच्छति। येन कर्मणाभिराराधितस्तस्य फलस्येष्टतत्त्वं चैव प्रयच्छतीति तल्लक्ष्मीः प्रदातुमर्हतीति वचन। न
देवतदवगम्यते कः किं प्रयच्छतीति। यथा सौ वचनेन तत्स्यं ॥ ॥ अपि वा नाह्यार्थवत्वाद् यज्ञकर्मप्रधानं स्याद् गुणत्वे देव
तासु श्रुतिः ॥ अपि वेति पक्षो व्यावर्त्यते। नैतदस्ति। यदुक्तं देवता प्रयोजिकेति। यज्ञकर्मैव प्रधानं यद्यजते जीतं म एवं।
कुतः। शब्दार्थवत्वात्। यद्धि फलं ददाति तत्प्रयोजकं। इदं फलं ददातीत्येतल्लक्षणं शब्दार्थवत्त्वं न मन्तव्यत्वादिभिरवगम्यते। राम
शब्दश्च यजति वाच्यो ऽफलमाहन देवतायाः कथमवगम्यते। दर्शपूर्णमासयोः करणत्वेन निर्देशात्। दर्शपूर्णमा

[illegible]मांस्वर्गकामोयजेतेति।तथाज्योतिष्टोमेनस्वर्गकामोयजेतेति।यजतेरर्थस्य
स्वर्गकामेनसमभिव्याहारोनदेवतायाः।ननुद्रव्यदेवताक्रियंयजत्यर्थःसत्यमेवंकिंतुगुणत्वेदेवताश्रुतिःद्र
व्यदेवतंहिभूतंनावयितव्याययजत्यर्थः।भूत[illegible]भव्यसमुच्चारणेभूतंभव्यायोपदिश्यते।तस्मान्नदेवताअ
येतिका।अथयदुक्तंकर्मणइप्सिततरमभिप्रेततरमितिनास्याभिप्रेततामपह्नुमहे।तद्धितत्राहनचतुर्थ्यावासंयु
क्तस्य[illegible]देवतार्थस्यवाकारकाभिप्रेततावगम्यते।फलसंयोगस्तुवाक्यादेवप[illegible]यजत्यर्थस्यांतसरवस्थताकरणताव
गम्यतेनदेवतायाः।तत्रयद्यपिदेवतार्थतायागस्यगम्यतेफलार्थतोपितेननप्रतिषिध्यते।फलंचपुरुषार्थःपुरु
[illegible]ध्रुवःप्रवृत्तिःनचासौदेवतायास्तस्मान्नदेवताप्रयुक्ताःप्रवर्तिष्यामहे।यात्तुसंप्रदानस्याभिप्रेततासाफल
[illegible]तःसाधनत्वेसत्युपपद्यते।यत्रयजिर्देवताप्रज्ञासाप्रज्ञमात्रप्रधानालोकेलक्ष्यतइतिनलोकवदिहम
वितव्यं।[illegible]इहप्रज्ञमानेप्रज्ञाप्रधानोयद्धिफलवत्तत्स्वयोजकं।तस्माद्यज्ञकर्म्मप्रयोजकं।अपिचैतस्मिन्नुपद्ला
विधायकृतीदेवतानंतेनैवत्वव्यवसानीयंभवति।नखविग्रहायैवअभुंजानायैवादानेनोजनेवासंभवतीति।यद्वोक्तं

स्मृत्युपचारान्यार्थदर्शनैर्विषयहवतीमुक्तेवेति। तन्न स्मृतेर्मंत्रार्थवादमूलत्वात्॥ मंत्रेभ्यस्थार्थवादेभ्यश्चस्मृ
तिमूलं विज्ञानमुपपद्यत इति प्रत्यक्षमवगम्यते। तेन मंत्रार्थवादानैर्वपरा उक्ता न तव क्षामः। आह। यदि नैर्वपरान
त हि मंत्रार्थवादमूलं तद्विज्ञानमिति। उच्यते॥ यत्रालोचनमात्रेणामंत्रार्थवादान्यत्र्यंति तेषामेतत्स्मृतिमूलं।
ये पुनर्निपुणतः पश्यंति तेषां तद्बाधितमपि वकस्य वितत्स्मृतिमूलं भवति। तस्मात्तत एव स्मृतिः। उपचारोपि स्मृति
मूलएव। यत्तन्यार्थदर्शनमुक्तं जग्राहमाते दक्षिणेनेंद्र हस्तमिति न तदेवंपरं इंद्रस्य हस्तो विद्यत इति। यस्तस्य
दक्षिणो हस्तस्तं वयं गृहीतवंत इति तस्मात्का दिं इस्य हस्तस्य सत्तानं प्रतीपते। आह। यदि तस्यैनास्ति वयं तं हस्तं
गृहीतवंत इत्येवं नावकल्पत इति हस्तसत्ता अवसीयते। अल्पसोहस्तो वयं यं गृहीतवंत इति। तन्नोपपद्यते। वि
द्यमानस्य हस्तो भवतु तथापि न तमुपगृहीतवंत इति प्रत्यक्षमेतत् तथापि तन्नावकल्पत एवात चैतत् दर्सं व दुर्वा
कल्पयितव्यं। स्तुतिर्वा तद्भवन्त्यक्षेपि तुल्ये। अथैव मुच्यते तस्येतद्धवनं यो गृहीतवान् तस्य हस्तमिति॥ उच्यते। नैत राम
दध्यवसेयं अदिमनादाषोवदस्यप्रसज्येत। न च गृहीतवानासीदित्युच्यते॥ प्रमाणाभावात्। एतस्मादेव ८

वचनादर्थः कल्प्यते हस्त्यग्रहीतेति चेत्तत्र । अयथार्थस्याप्युच्चारणं संभवत्येव यतो । यथा दश दाडिमा
नि षडपूपा इति ॥ यस्यापि चैष पक्षो विग्रहवान् इन्द्र इति तस्यापीन्द्रादिना मन्त्रेण संबोधनार्थं । संबोधनमनु
वचनाय तत्र संबुद्ध्यस्यावगतेरत्र नु वचनमाख्यं । न चासौ वचनु विलक्षणेन संबुद्ध्य इत्यवगम्यते । अनवग
तसंबोधनं व्यर्थं वचनप्रामाण्यात्संबुद्ध्यत इत्यवगम्यत इति चेत् । उक्तमदृष्टकल्पनायां हस्त्यादिकल्पनानु
पपत्तिरिति । न चासौ संबुद्ध्य इत्यवधार्यते । प्रमाणभावात्तस्मात्संबोधनवचनेन संबोधनाय निर्दिष्टार्थमेव
अविग्रहरूपं क्षेपितं निर्देशार्थमेव मनविष्यति तत्रामन्त्रितविभक्तिवचनं स्तुतयोपचर्यमिदं देवतास्वेवासा वचं
साधयितृतमं यज्ञवचनादिवत्संबुद्ध्यसाधयतीति चेत न चैवोपचर्यमाणः । संबुद्ध्यत्वाद्येनामन्त्र्यते तथा संबोधन
त्वाद्येन निर्दिष्टरूपाख्यातां गृहीतवंतो न यंतवरस्य तद्दाश्रयावयमित्यर्थः । अस्माभिर्विङ्क्षर्मणि कर्तव्यमित्यत्र
दनेन स्माय्यते । तथा इमे घावापृथिवी वो हे अपरेयत्संम्यक्ताः सिमस्य वन्न होते । प्रशितो ऋष्टिरिति संततमि स्तुत्य
स्तुत्यर्थं नवदति । तस्यापि भावेन प्रमाणमस्ति । न देवच नेद तमहाकमिर ति । किं तर्हि यस्य वचनाहि । समर्थ

भा॰न॰ ९ निति। अन्योर्थस्तवकाशिरस्ती लन्पस्तावकाशिर्महानिति। सताहि स्तुतिरूपपद्यते इति वेदनैतन्नियोगातोयस्यापि
पौरुषविधिकैरंगैर्नास्ति संयोगः पौरुषविधिकैस्तैस्तस्यापि स्तुतिर्भवति। यथाएतेवदंतिज्ञानवत्सहस्त्रवदभिक्रं
तिहरितेभिरासभिः॥ विस्वीयावाणः सुहस्तः सुहस्तयाहोतुष्पित्सूर्वे हविरघमात्रासेति।। तथासुखेरथंपुरुषे
सिंधुरश्विनमिति॥ तस्मान्नस्तुतिवचना स्थापत्तिर्भवति पुरुषविधत्वे देवतायाः तथा तु विग्रीवरंद्र इति नैव तु कंभव
तिग्रीवावानिन्द्र इति। किंतर्हि यास्य ग्रीवासामहती ग्रीवासत्वेनास्ति प्रमाणं। न च ग्रीवास्तुति रथापत्तिः। अपुरुष
विधेपि स्तुत्युपपत्तेः॥ अपिवेदवचनानि जिघ्रते इत्येतान्यभिदधदः संबंधेन कामेति तु विग्रीवादिभिः संबंधेयातु
हिरुच्चारणमस्यप्रसज्यते। तु विग्रीवावानिन्द्रो वेदितव्यो वचनानि वंदनाह इति। तथाहि सति भिद्यत अभिन्नं च वाक्य
मुपलभ्यते। तदेवमवकल्पतेयदि तु विग्रीवादयोस्यनोपदिश्यंते इति स्तुत्यर्थं संकीर्त्यते तु विग्रीवादिः अंचसो
मदेवो वचनानिरंतीति एषानुवचनव्याप्तिः वचनवधोपदेश्यापरमिदं वचनं इति। यदपि वचनंबाहूतेरं प्रारामा राम ९
नो॥ अश्नीतेंद्रपिंगले इति तदपि वाक्योरामन्नात्वमन्नोश्वपैंगल्यमाहनवाक्यस तामश्विसत्तोवोयदप्पाकि

मन्त्रो वदतीति गम्यते। वक्ष्यमाणे इत्येवं तेन ब्रवीमीति। तदपि न वक्तुः संबंधार्थं वक्ष्यमाणे ब्रवीमीति वचनं सं
बंधार्थं तत्सतीमिव वक्ष्यमाणं॥ स्तुत्यर्थमुच्चारयति। कुत एतदवगम्यते॥ वक्तृर्थाभिर्हि ज्ञातत्वयदि प्रातिपदिक
र्थो यावसीयते तथा वाक्याभिधेयं। वक्ष्यमाणानि त्येवं वादिरूपेत वक्ष्यमाणे तेन ब्रवीमीति वतस्मान्न किंचिदन्या।
र्थदर्शनेन पुरुषस्य विवक्षिता देवतायामिदं स्थापयतीति। न चेदं भोजनं नहि देवता भुंक्ते। तस्माद्भोजनस्यातद
र्शित्वात् इति तदसद्वचनं। यदपि स्मृत्युपचारान्नार्थदर्शिनी भुंक्ते इति तदपि यद्दूरत्वेन प्रत्युक्तं। अपि च भुंजानायै
देवतायै प्रत्तं हविः क्षीयते। न च मधुकरीवदन्नरसमभोजिन्यो देवता इति प्रमाणमस्ति। मधुकरीषु प्रत्यक्षं न च त
द्देवतायां तस्मान्न भुंक्ते देवतेति। यदुक्तं देवतायै हविः प्रत्तं नीरसं भवतीति। नैष दोषः। कालतोप्येतन्नीरसं भवति
शीतीभूतं वा। न चासौ कस्यचिद्दृष्टस्योपच्छेदनी रसस्य कथं दास्यतीति। यदुक्तं स्मृत्युपचारान्नार्थदर्शिनी रीत्यान
रूहवतत्त्वमवगम्यत इति। तन्न। स्मृतेर्मन्त्रार्थवादमूलत्वादित्युक्तं। उपचारोऽपि देवयामो देवतेत्यमिति उपचारम
ध्येयो यदभिप्रेतं विनियोक्तुमर्हतीति तत्तस्य स्वं न वयामं च्छेत्त्वं वा यथाभिप्रायं विनियुंक्ते देवता। तस्मान्न स

भान्न
१०

प्रयछतीति देवपरिवारकाणां तु ततोन्यतिर्न्न वति देवता उद्दिश्य यत्त्यक्तं यदुक्तमन्नार्थदर्शनमसी स्थानां देवतानां
स्थापयतिरुद्रो दिवरुद्रइन्द्र इत्येवमादीति। तत्रात्र तस्थानीयानां देवतानामुपलम्भाद्यवस्थामेनामुक्त एष आद्द इति।
तत्राह। ववनप्रामाण्याद्देवतास्थाईशान तावगम्यते। यद्देवलका अर्थाद्विनि भुंजते तद्देवतानामभिप्रायाद्देवत
व्यवस्थामर इति। तन्न। प्रत्यक्षाप्रमाणाद्देवतापरिवारकाणां अभिप्राय इत्यवगम्यते सनशक्यो वाधितुं येपि देवता
मीशाना वर्णयंति तेपि नापह्नुवते परिवारकाणाममभिप्रायं किंवा ऽन्ते तथा देवताकरेतिय थापरिवारकाणाम
भिप्रायो भवतीति नवसई शानो भवति यः परमभिप्राय मनुरुध्यते यस्य न स्वाभिप्रायाद्विनियोगो भवति। अ
पि च नचैतद्वस्त नं वर्त्तमानकालोपदेशत्वात् प्रत्यक्षविरोधान्स्तुतिवादो वद्यायेतस्तुति वदिव संभवति नव
ववनप्रामाण्यादीशिष्यत इति गम्यते न च देवता फलेन संवध्नाति यातदर्थे वर्त्तमानकालोपदेशत्वात प्र
त्यक्षविरोधान्स्तुतिवादो वद्यायेतस्तुतिं परिवर्ण्यते यदुक्तं स्मृत्युपचारात्पार्थेदर्शने ईदातिप्रसीदति राम
वेति। तव वस्मृत्युपचारयोरुक्तौ। यदमार्थदर्शनं तस्मै प्रीताइयमस्तु उं प्रयच्छतीति। तन्न। अन्यस्यवि धे १०

यम्नानात् दक्षिणतः संपरिहर्त्तव्या इत्याहेति। तथात्म एवैनमिंद्रः प्रज्ञया पशुभिस्तर्पयतीत्यत्र ऐंद्र
स्य हविषो विधानं। तस्माद्देवतानाम्प्रयोजिकेति। अतिथ्यातस्य ... भावः ... एस्यात्र ... प्रीतिप्रधान
त्वात्। यदुक्तमतिथौ वर्द्धिततत्परिहर्त्तव्यं। आतिथ्यमतिथ्यर्थं प्रयुक्तं स्यात्॥ अतिथ्यर्थे हि तत्प्रतीर्दिर्धीयते। अति
थिः परिचरितव्यः यथा प्रीयते तथा कर्त्तव्यं इति दानं भोजनं वा कार्यमिति यद्यदतिथये रोचते तत्तत्कर्त्तव्यं य
स्मै न रोचते तेन तदलंकारयितव्यमिति। इहत्त्व कर्म्म एव भावः प्रीतिविधानस्य ... स्माद्विषमतिथिनेति।
द्रव्यसंख्याहेतुसमुदायं वाक्यश्रुतिसंयोगात्॥ दर्शपूर्णमासयोरामनंति व्रीहीन्प्रोक्षतीति तत्रैव त्रीन्परिधी
न्प्रतिस्त्रः समिध इति मंत्रवत्तु हैत्रा पौर्णमासीमभिमृश्योत्सवरो चामावास्यामिति वा चातुर्मास्यानां द्वितीये पर्व
णि वरुणप्रघासेष्वाम्नायते शूर्पेण जुहोतीति तेन यद्यत्रं क्रियते इति तत्र संशयः किं द्रव्यसंख्याहेतुसमुदायप्रयु
क्ताः प्रोक्षणादयो धर्मास्तत्पूर्वं प्रयुक्ता इति किं तावत्प्राप्तं द्रव्यादिप्रयुक्ता इति। इह व्रीहीन्प्रोक्षतीति प्रकरणे
नापूर्वप्रयुक्तता स्यात् वाक्येन द्रव्यप्रयुक्तता। द्रव्येण हि प्रोक्षणस्य समभिव्याहारस्तस्मिन्नपि समभिव्याहारे

त ५

भा० न० इत्यगवादि द्वितीया विभक्तिः प्रोक्षणस्य द्रव्यप्रयुक्ततां वदति। तथाग्नीन्ध इधीनिति यत्रिश्राद्रस्याभिधेयं तदि
११ ष्मं त्राग्मानसामर्थ्याद्वदित्यमिति गम्यते। संख्यावन्निशद्रस्यार्थः तस्य च कृतिकीविकावत्संबद्धे त्रपूर्वेलक्षणा
स्यात्। यावन्तः परिषयस्तावं तोवक्तव्या उक्ति। तथा हेतुनावर्मः संयुक्तस्तेवाक्येन श्रूर्येणाज्जुहोतीति। किंकारणं य
तस्तेनान्नं क्रियते तद्धोमेन संबद्धव्यमन्नकरणद्रव्यं होमे विधीयते॥ प्रकरणाद्दर्शपूर्वप्रयुक्तता स्यात्। यस्मादनेन
होमेनापूर्वं क्रियते तस्मादेतच्छूर्येण निर्वर्तयितव्यमिति। प्रकरणाद्धावंबलीयः अतः प्रकरणं बाध्येताये
नयेन द्रव्येण दर्विपि०ठरादिनाप्यन्नं क्रियते तेन होमः कर्तव्य इत्येवमन्नकरणं सगुणं भवतीति। ननु प्र
यमध्याये प्रतिषिद्धारस्त्वर्थतामपूर्वस्य अर्थवादोयमित्युक्तं। सत्यमुक्तं। अपूर्वप्रयुक्ततायां हि सिद्धायां नैकस्मि
न्वाक्ये हेमिम्यपूर्वविधानं हेतुविधानं वा वकल्पत इत्यर्थवादः प्रकल्पते नान्यथा। चतुर्दशी चापौर्णमासीमभिपद्ये
तं व रूचामावास्यामिति समुदायसमभिव्याहाराद्वाक्येन तत्प्रयुक्तता प्रकरणसामर्थ्याल्लक्षणया पूर्वसम राम
भिव्याहारादेवगतामपूर्वप्रयुक्ततां बाधते। तस्मान्मन्त्रादिप्रयुक्ताः प्रोक्षणादयो धर्माः॥ ॥ अर्थवादित्व ११

द्रव्येणानवक्लृप्तः स्यात्॥ अपूर्वप्रयुक्त एवंजातीयको धर्मः सति द्रव्ये एव धर्मव्यवस्था न स्यात्। पयसा मै
त्रावरुणं श्रीणाति। सक्तुभिर्मन्थिनं धानाभिर्हारियोजनं हिरण्येन शुक्रं माज्येन पात्नीवतमिति यस्मा
न्मैत्रावरुणोऽपूर्वस्य तस्मात्पयसा श्रयितव्य एतत् ऐन्द्रवायवोऽपि अपूर्वस्य सोऽपि पयसा श्रयितव्यः अ
प्नोति एवं सर्वाणि श्रयणादीनि सर्वेषां ग्रहाणां तत्र मैत्रावरुणादिग्रहणमविवक्षितं स्यात् तस्माद्पि द्रव्या
दिप्रयुक्ताः श्रयणादय इति॥ ॥अर्थो वा स्यात्प्रयोजनमितरेषामचोदनात्तस्य गुणभूतत्वात्॥ वाशब्दः
पक्षं व्यावर्तयति। न द्रव्यादिप्रयुक्ता भवेयुः किं तर्हि एषां प्रयोजनं अर्थेऽपूर्वं विहितः तदर्थीसौ ते हि कर्त
व्यतया श्रूयते। यस्य कर्त्तव्यतया श्रूयते तदितिकर्तव्यतयानुबध्यते। इतरेषां द्रव्यादीनां कर्त्तव्यतया न चोदना ति
तर्हि त्रिर्थस्य गुणभूतत्वेन अर्थं प्रत्यपूर्वं प्रति गुणभूतानामेषां श्रवणं। किमतः यद्येवं अकर्त्तव्यानामिति
कर्त्तव्यतया नास्ति संबंध इति। ननु व्रीह्यादिसमभिव्याहारात्तैरपि संबंधः तत्र द्वितीयया व्रीहिसमुदायप्रयुक्त
तागम्यते। लिंगवाक्याभ्यां संख्याहत्तु प्रयुक्तता नेत्याह॥ एवं सति फलं कल्पनीयं स्यात्॥ तस्मादपूर्वप्रयुक्त

~~सत्यं कल्पयितव्य~~ [illegible]

मा॰न॰ १२ तान्न्येवमपि सत्यपूर्वोपकारः कल्पयितव्यः। प्रकृतेन त्वेकवाक्यतां नीत्वा। त्वत्पक्षे तु प्रकृतेन फलवत्त्वेनैक
वाक्यतास्यात्। ननु प्रकरणं वाक्यस्य श्रुतेर्वा न बाधकं। सत्यम् बाधकं फलाभावात्तु भवदीयः पक्षोनुपपते तस्मि
न्नानर्थक्ये न विवक्षिते प्रकरणेव ताप्रयोगवचनेन परिपंथिप्रोक्षणादि विधायिष्यते। आह। अपूर्वसंबंधेपि
तदीयैः व्रीह्यादिभिरेव धर्मैः प्रयुज्यते। किमेतेन। किमेवं भविष्यति। द्रव्यादिसंबंधश्च एवं हि नावज्ञातो भविष्य
ति। फलं च न कल्पयितव्यं उच्यते। नैवं शक्यं व्रीहीन्प्रोक्षतीति इह व्रीहिजातिर्निर्दिश्यते व्रीहिद्रव्यलक्षणार्था
वा अपूर्वसाधनविशेषलक्षणार्था वा अन्यतरलक्षणयाश्रितार्थैति नोभयलक्षणार्था स्यात्। द्रव्यलक्ष
णे वा तत्र च लक्षणैव दोषः फलकल्पनेति कृत्वा साधनविशेषलक्षणार्था जातिरध्यवसीयते। व्रीहिजातिलक्षितं
साधनंकि यत्तैयतस्तं तुलानवंति तत्प्रोक्षितव्यं इति तंडुलनिर्वृत्तिकरतां हि तस्य साधनत्वं न द्रव्यता। एवं संख्यादिष्वपि
[illegible] ३ योजयितव्यं। तस्मादपूर्वयुक्तानां प्रोक्षणादीनां मिति॥ ॥ अपूर्वेण व्यवस्था स्यात्। अथ यदुक्तम् अर्थकृ राम
रितो वद्रव्येण न व्यवस्था स्यात् इति साधनविशेषलक्षणार्था जातिरित्येवं सति व्यवस्था भविष्यति। मैत्रावरु १२

णेन मल्लिक्रियते तत्र श्रयणेन तद्देदं द्वाधवेना । अतो न मैत्रावरुणस्य पूर्वादिं द्वायदस्य धर्म्माः अपूर्वौ हि
द्वायवर्सौस्तस्माद पूर्वत्वा धवस्थान्त इति ॥ तन्ननु क्रोत्वे वधर्म्मस्य सर्वविषयत्वं । यच्च मन्यते द्वयादि प्रयुक्ता
प्रोक्षणादयो धर्मा इति । तस्य सर्वविषयता धर्म्मस्य प्राप्नोति । येपि मक्षार्यार्थाः व्रीहयस्तेप्ये वंप्रोक्षितव्याः प्र
क्तवंति । नैव तत्र व्यापीष्यते । तस्मादयमस्मिन्न द्वेदोष इति ॥ ॥ तद्युक्तं प्यनिवत ॥ इति चेत्स्यपस्ति सर्वविषयता
धर्म्मस्य भविष्यतीति । तद्युक्तस्य प्रकरणपुक्तस्य भविष्यति । एवं प्रकरणमनुष्टस्यते । न च सर्वविषयता धर्म्म
स्येति ॥ ॥ श्चान्य तिलात ॥ नैतदेवं न हि श्रूयते प्रकरणपुक्ता व्रीहयो निर्वपूर्व्वाः प्रोक्षितव्या इति । ननु प्रकर
णानुयरायैत दघवसानेनेत्यारह । नहि वाक्यं न बाधितं प्रकरणमुत्सरते धर्म्मान्नियंतुं । अथापिन वाध्यते तथा
पि न प्रकरणस्य विशेषं सामर्थ्यमस्ति । क्रतेर्यतयाहित तत्क्रियमाणं बाधत इति न प्रसिद्धं संबंध भिवविशेष
णत्वेन । तस्मान्न प्रकृत याग विशेषितानां व्रीहीणां निर्वापः प्रोक्षणं वा बाधत इति ॥ ॥ अधिकारादिति चेत ॥ इति चे
त्तदप्यस्मिन प्रकरणं विशेषकं व्रीहीणामिति वाढं अधिकारात्तस्य तत्य धर्युः इमेमक्षार्यार्थास्मे कार्यार्थाः तत्र क

आ०न० यीर्थानूप्रोक्षिष्यतीति॥ ॥तुल्येषु नाधिकारः स्याद्देवोदितत्वं संबंधः॥ एषयद्भूसतां यत्नार्थेन। अभिसंबंधस्ता
१३ स्माधनप्रयोजनं। तुल्याएतेत्रीह्योय एवमन्कर्थीस्तएवकर्म्मार्थी:॥ नष्टयद्भे विकर्मार्थिनामननुये निरुप्ता
स्तेकर्मार्थी: सतंमवेदेतत्। प्रोक्षणादिषु दोषान स्यात् निर्वापेतदोष: नैनतत्र के वन वताविघंते। एषयद्भूस
तांयत्नार्थेन निर्वाप: श्रूयते। कथं। अपरेणगार्हपत्यं मागीषमनोवस्थितं भवति तस्य दक्षिणं वक्रंतारुह्यानसोधि
निर्वपतीति। तस्मात्कर्म्मस्य सर्वविषयबलं साक्षात्संवपूर्वेण हेतुनाश्च पूर्वप्रयुक्तत्वं प्रोक्षणादीनामिति॥ ॥दे
शापवर्गमुपांशुत्वं तेषां स्यात्। अनिर्दिष्टान्यत्र सवतत्रमावात्। ज्योतिष्टोमे समाम्नायते। सरांशेएषापत्नस्यतस्मा
घत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशुचरंतीति। तत्रैषोर्थः सांशयिकः। किं प्रागग्नीषोमीयाद्यानि कर्म्माणित
त्प्रयुक्ताउपांशुत्वं उत परस्मात्पूर्वं प्रयुक्तमिति। किं प्राप्तं। प्रागग्नीषोमीयाद्यान्यंगानि पूर्वाणि आरादुपकारकाणि प्रत्र
प्रधानद्रव्यसंस्कारकं तत्प्रयुक्तोपांशुधर्म्मो यादेशसंबद्धः॥ कुत एतत् अतिनिर्दिष्टात्॥ मर्यादया देशकालचिता राम
येपदार्थाः तेभ्यासाएतेन धर्मेण संबद्धाः। यएतस्मिन्देशेपदार्थास्तैरुपांशुचरंतीति। ननुवाक्येनैषधर्मोविधिप्रयुक्तो १३

नश्रुत्या न श्रुमोन वाक्येनेति किं तर्हि श्रुतेनास्यैकवाक्यता न प्रकृतेन क्लृप्तेन कल्पितेन वेति उच्यते श्र
ह्लीम एतदंगाहवर्णामयं धर्म इति। ननु प्रधानद्रव्यस्य संस्कारकं यदपूर्वं तस्यापीति। कथमत्र यत्प्रधानद्रव्यसंस्का
रकं पूर्वस्मिन् देशोऽस्तीत्युच्यते। तस्य च तत्र भावात्। तस्यैवं जातीयकस्य पूर्वस्मिन् देशेऽभावात्। अस्ति हि सोमपरिव
क्रीयं नाम तत्र तस्माद्देशाद्धर्मो भविष्यतीति। यथा प्रणीताः प्रणेष्यत्वादंय क्षतितास हविष्कृता विसृजतीति।
अस्मिन् देशे ये पदार्थास्तेषां धर्मो वाक्यमेतत् प्रधानापूर्वस्यैव भिद मम्युपागत्वमिति॥ ॥यजमानस्य वा तत्संयोगात्।
शब्दादर्थ्यात्तो विपरिवर्त्तते। नैतदस्ति देशानां धर्म इति। कस्य तर्हि परमापूर्वस्येति। कुतस्तत्संयोगात्। तत्संयोगो न
वति यजमानस्य संयोगात्। तस्य एव वा एषा यजमानस्य यत्प्राचीनमग्नीषोमीयादिति पर्त्तते। नैतदस्ति तद्देशानां यजमानस्य य
स्प्राचीनमिति संबंधः। न तस्य एव वा यजमानस्येति कुतः। प्राचीनं विशेषणं यजमानस्येति शब्दो विधिपदशेषो भवति। ततः प्रकृति
विशेषको भविष्यति। इतरस्यार्थवादशेषः स्वतन्त्रार्थकः स्यात्। वा दमात्रं स्वनर्थकमिति प्राचीनमिति तिवयजमानागंस्का
त्वावदति। लक्षयति वत इतान् पदार्थान्। श्रुतिलक्षणेति षएव श्रुतिर्व्याख्यास्यात्। तस्मात्प्राग्देशस्यैव धर्मः। त

नास्य पृथक्त्वात् संयोगः न प्रान्देशागतानां पदार्थानां तैर्वृक्षस्य लक्षणया संबंधः स्यात्। अयथार्थवादपददोषाय
तस्यैतिस्मात्। तथापि प्रान्देशाः स्कन्धधर्मेण संबध्यते। प्रान्देशागताः परोक्षलक्षणयेति यत्नप्रयुक्तो नैव न्याय्या। अपि
च प्रतपस्य उपकारः परमापूर्वस्य लक्ष्यते। यत्प्राचीनमग्नीषोमीयात् तदुपांशुत्वेन शिथिलप्रयत्नः प्रचरन्न् अखिन्नः
सुखेन कुर्वन्तं सौत्तमहर्भिर्वर्हति। तस्मात् परमापूर्वप्रयुक्तमुपांशुत्वमिति॥ अनुवादस्थतदर्थवत्त्व॥ अनुवाद
स्थतद्देशपदार्थस्यैव भवति। तस्य वा एषा यज्ञस्य यत्प्राचीनमग्नीषोमीयादिति। त्सरा नाम छद्मगतिः। यथा श
कुनिया हरकस्य शाकुनिर्निघ्नतः छद्मना गतिर्भवति शनैः पदन्यासो दृष्टिप्रणिधानमशब्दकरणं च कथम
यं नुबुद्धः शाकुनिर्गच्छेतेति। एवमिहापि अनवबुद्धमिव यद्धीतं यत्संप्रचरणगतिरुपांशुत्वं नाम। यथा शकुनि
या हरकस्य यस्मिन्देशे शनैः पदन्यासो न स तद्देशार्थः अपि तु तद्देशाभिगतस्य शाकुनेरर्थे न क्रियते। एवमि
हापि उपांशुत्वं न तद्देशानां पदार्थानामर्थेन क्रियते तद्देशाभिगतस्य यज्ञस्यार्थेन गम्यते। यस्तु त्सराशब्देन राम
तविशेषणमनुतेतस्य स्तुतरामर्थवादः परमापूर्वप्रयुक्ततोपवर्ण्यते। यत्तस्यैषा त्सरेति। यथा शाकुनेः त्सरा एवं य १४

कुर्येति। आग्नीतादितयेतिचेत्। इति यदुक्तं तत्परिहर्तव्यं॥ ॥ न यज्ञस्याङ्गितिलात्॥ नैतदेवं द्वेक्षपदार्थप्रयुक्त
तैवस्यान्नपरमाएवंप्रयुक्तेत तिनाच्चपदार्थानां यज्ञमागति त्रोष्यतावाग्यमसंबंधेनावगम्यते। यज्ञस्याङ्गितिलात्।
नाच्चसंबंधीमन्त्रब्राह्मणः श्रूयते। नचिदानीमेवोक्तं यज्ञं निष्पन्नावध्वर्युयजमानौ वाचंयच्छत इति। उच्यते॥ तद्देश
पदार्थप्रयुक्ता। तायामथैतदवकल्पते। कथं यज्ञं विस्तारयितं वाचंयच्छतः। तौ वाचंयमौ संतौ अविक्षिप्यमाणएवेत
स्मैपदार्थेषु क्रियमाणेषु अप्रमाद्यंतौ तत्करिष्येते। यथान कश्चित्पदार्थः प्रदार्थाद्वयवोवा हीयते अध्वर्युवीग्युक्त
नानन्यचेतस्कोनपदार्थात्प्रमादयिष्यति। यजमानश्चैवंवाग्यमेनानन्यचेतस्कः प्रमादयिष्यंतं तं वोधयिष्यति।
ऋगै रथ्यानंतरीयमात्मीयर्यज्ञो विस्तार्यते न केवलैः स्वैरवयवैरङ्गैश्च विस्तारयितुं वाग्यमः शक्नोति अस्मिन्
काले क्रियमाणेन स्वेनाङ्गेन नापि तत्संयोगश्चाच्च विस्तारसंबद्धस्तस्मादङ्गप्रयुक्तौ तौ मप्युपपद्यते। यदध्वर्यु
यमानौ वाचंयच्छतः तत्प्रजापतिरूपं गतौ यज्ञं तन्वातेरति दृष्टेन कारणेन नादृष्टेनेति वर्त्तमानकालाप
दनादवगम्यते। यथावयंवाग्यमेन तायमानं यज्ञं विभ्रस्तथेति॥ ॥ तद्धस्तानोवासंघातस्यावोदितत्वा

न. १५

त्वास्थिता दुत्तरवाक्याच्चात्पक्षविपरिवर्त्त्ये यत्नैतद्दर्शिपरमार्थं पवयुक्तमुपांशुत्वमिति। कथं तर्हि प्राचीन
मग्नीषोमीयाद्युपदार्थस्तत्प्रयुक्तं। कुतः संघातस्याचोदितत्वात्॥ संघात इति यदुच्यते स संघातं ब्रूमः। न तस्या प२
यं भागउपांशुत्वेन संबध्यत इति चोदनाने वं संबंधः क्रियते। यत्तस्य यत्प्राचीनमिति। कथं तर्हि तस्य रत्व एवायज्ञस्येति।
कुतस्तस्मादिति पदेन व्यवधानात्॥ अथापि प्राचीनेन संबंधः स्यादेवमपि न परमार्थं वं यत्नयुक्तं। नह्यदित्व ने
न देशो भिसंबध्यते। किं तर्हि दृष्ट्यागताः पदार्थाः। यदि देशोभिसंबध्येत यत्प्राचीनमग्नीषोमीयादिति भवेन्नय
त्किंचिदितिवीप्सायां सत्यां भवति। वीप्सा च व कुतुभवति नैकस्मिन्नेकदेशोवरुवस्तत्र पदार्थाः तस्मात्पदार्था
नामुपांशुत्वेन संबंधो न तद्देशस्येति। कथं पुनर्वीप्सावगम्यत इति। यदित्व ने न लभ्यते। किमित्युच्यमान च चनं
विशेषाश्रयाणां तानि मिश्राः प्रतीयंते। व ऋतुचैसामान्यं विशेषाश्च भवंति। तस्मान्न देशः पदार्थी वीप्सयालु
भ्यंते। तेषामुपांशुत्वेन संबध्यंत इति। ननु दीक्षणीयादिषु नो चर्म्मोक्तः यावत्तावाचाकामयेत तावत्पादीक्षणी राम
यायामनुब्रूयात्तैरन्नेंद्रप्रायणीयायां मंद्रतरमातिथ्यायामुपांशूप सद्स्विति कथं तत्रोपांशुत्वं कर्तुं शक्य १५

मित्युच्यते। स यथा प्रयाजेषु भविष्यति दीक्षणीयादिषु प्रधानस्याङ्गोपबंधत्वाद् दर्शपौर्णमासं प्रधानवर्जितेष्व
ङ्गेषु निवेक्ष्यते सामान्योपदेशात्। प्रयोजनं कुंडपायिनामयने मासमग्निहोत्रं जुहोतीति एवमादौ निप्राग
ग्नीषोमीयादेः पशुतन्त्रस्य संबन्धो न भवति यथा एवं पक्षः। यथा तर्हि स्विष्टकृतो न संबन्धः॥ अग्निधर्मः प्रतीष्टकं सं
घातात्पौर्णमासीवत्॥ अस्त्यग्निः य एवं विद्वानग्निं चिनुत इति चैवं समाम्नायते। हिरण्यशकलैः सहस्रेणा
ग्निं प्रोक्षति। दध्ना मधुमिश्रेणाग्निं प्रोक्षति॥ वेतसशाखयावकाभिश्चाग्निं विकर्षति। मण्डूकेनाग्निं विकर्षति। तत्रा
यमर्थः सांशयिकः। प्रतीष्टकं किं विकर्षणं प्रोक्षणं च कर्त्तव्यम् अथ सकृद् देवकर्त्तव्यमिति। तन्नैवं तावद्विचार्यते। कि
मिष्टकासमुदाये ग्निशब्द उत ततो व्यतिरिक्ते द्रव्यान्तर इति। यदि समुदाये ततस्तल्लक्षितानामिष्टकानामगम्यमा
ने विशेषे सर्वासां प्रोक्षणं विकर्षणं चासमवाद्द्रव्यान्तरे ततः सकृदेवेति। किं प्राप्तं। प्रतीष्टकमिति। कुतः समुदाये
ह्यग्निशब्दो वर्तते। कथमवगम्यते। द्रव्यान्तरस्याभावात्। द्रव्यान्तरमेव नास्ति कोऽग्निशब्देनाभिधीयेत। कस्मि
न्नग्निर्निधीयते ति। कथं पुनर्नास्तीत्यवगम्यते। द्रव्यान्तरे चेलक्षणात्। तत्र हि द्रव्यान्तरमस्तीत्यवगम्यते यत्रै

कस्मिन्नवयवे गृहीते कृष्यमाणे कृत्स्नः कृष्यते । कोऽभिप्रायः ॥ यद्येकोऽवयवो हस्तेन संयुक्तः कृष्यते न द्रव्यां
तरं कः प्रसंगो यत्तद्वितीयोऽप्यवयवः कृष्येतेति । अथ द्रव्यांतरमपि तत्र कृष्येत तत्र द्रव्यांतरस्य समवायिनां अवय
वानामपि निर्भागात्कर्षणमुपपन्नं । न तु संयुक्तसंयोगस्य द्रव्यांतरादृते धर्म्म एषोऽवकल्प्यते । न ह्यवष्टब्धे काष्ठपूलके काष्ठ
एकस्मिन्नाकृष्यमाणे काष्ठांतराणि कृष्यंते । यत्र हि परस्परव्यतिषंगजनितैकबुद्धिर्भवति नावयवबुद्धिर्दृश्यते नापि
केनचिदनुमानेनानुमीयते तत्र द्रव्यांतरं जातमित्युच्यते । इह तु यैवेष्टका गृहीता कृष्यते सैवागच्छति नेष्टकांत
राणि संधिशिथिलत्वात्तेन नावयवसंस्पृतिरस्तीति गम्यते । तस्मान्नास्ति द्रव्यांतरं तत्रेष्टकाभिरग्निं चिन्वीतेति वच
नमात्रमिष्टकाभिः कर्त्तव्यं । न वचनमात्रेण कृते न किंचिद्दृष्टमस्ति तस्मादग्निनिर्वाणार्थानामिष्टकानां वचनस
मुदायोपलक्षितानाम गम्यमानेऽपि विशेषे सर्वासामेव प्रोक्षणं विकर्षणं न कर्त्तव्यं । पौर्णमासीवत् । यथा य एवं वि
द्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यां यजत इति आग्नेयादय एव प्रकृष्यैतेनार्थांतरं किंचिदेवमिहापीति ॥ राम
अमावास्यात्तदैन्द्रकाल्यादितरामावादर्शत्वात् ॥ वाक्याद्वात्वोऽपि परिवर्त्तेते । नैतदस्ति यत्तीर्णं कर्त्तव्यमिति । कथं त १६

र्हिसंस्कुर्देवेति। ततएतद्रूपेते। द्रव्योत्तरमिष्टकाभिः क्रियते। तच्चाग्निर्निर्वर्तयितव्यः। तत्रचाग्निशब्दोऽवगतइति। कथं
परार्थेनेष्टकानां निर्देशात्। इष्टकाभिरग्निं चिन्वीतइति तृतीययाविभक्त्या पारार्थ्यमिष्टकानामवगम्यते। यदि
चयनमात्रमचोद्यते तदिष्टकासंस्कारार्थमवगम्यते। तत्र द्वितीययाविभक्त्या संयोगः स्यात्॥ तृतीययासंयोगो
बाध्येत तस्मादिष्टकाभिरन्यत् क्रियते। तच्चाग्निर्निर्वर्तयितव्यः। तदर्था इष्टकाश्चयनं वेति। आह। नन्वेतदुक्तं तस्याभावाद
श्मन्यः पक्षः परिगृह्यतइति। उच्यते। नाभावः प्रत्यक्षत्वात्। नैककुड्यः सावल्मीकादिष्टकासुनापक्लृप्यते न वा वयव
धिर्हिरण्यपात्रे पुरीषवत्त्वात्। तस्मात्सकामसंयोगेप्य कुड्यरूत्पादादन्यमिष्टकाभ्योव्यतिरिक्तं द्रव्यमग्निनिधानार्थमस्ति।
यदिवा इष्टकासंस्कृतिरप्यकुड्यैरेवावगम्यते। यत्विष्टकाकर्षणेन कृत्स्नावकर्षणमिति। सतं संस्कृतोतत्त्वविष्टेदः
क्रियते हि यानि द्रव्याणि स्थावराणि जङ्गमानि वा तत्र स्थावरेषु विच्छेदो न भवति। यथा वनस्पतेः पर्णे गृहीते
कृष्यमाणे न कृत्स्न कृष्यते स्थावरत्वात् एवमिदमपि स्थावरं हीदमग्निद्रव्यं। तस्मात्सकृदेव प्रोक्षणं विकर्षणं च
कर्तव्यमिति॥ नोदनासमुच्चयात्कुर्यान्मासांश्चयात्स्यात्॥ अथयदुक्तं यएवं विद्वान्पौर्णमासीं यजतइत्येवंप्र

द्यानमावास्यां यजत इति नाग्नेयादिमः किंचिदर्थांतरं तथेहापीति। उच्यते। युक्तं पौर्णमास्यां तथाभावः॥
वादनः समुदायो हि तत्र क्रमेण वर्म्मसाद्ध्यं विधीयते इह तु द्वयात्तरमस्तीतु क्तं। तस्माद्वैषम्यं पौर्णमास्येति। पत्नीसंय
जांतं सर्वेषामविशेषात्॥ अस्य हर्गणः द्वादशाहे न प्रजाकामं याजयेदिति। तत्र श्रूयते। पत्नीसंयाजांतान्य
हानि संतिष्ठंत इति तत्रायमर्थः संशयितः किं सर्वेषामंगानां पत्नीसंयाजांतत्वमुत तेषां उत्तमादिति। चोदकम
वर्जयित्वा संदेहः क्रियते तस्य हि मानसांतता वचनेनोक्ता। उक्ता वस्था प्रस्ते। सर्वेषामंगानामिति। कुतः अविशेषा
द अविशेषेणोच्यते। पत्नीसंयाजांतान्यहानि संतिष्ठंत इति। न च कश्चिद्विशेष आश्रीयते तस्मात्सर्वेषामिति॥ ॥लि
गाद्यामसुत्तमानां॥ वा शब्दः पक्षं व्यावर्त्तयति। आद्युत्तमादंगात् पत्नीसंयाजांततास्यात्। कुतः लिंगात् लिंगं न वृत्ति पत्नी
संयाजांतान्यहानि संतिष्ठंते न बर्हिः प्रहरति अ संस्थितो ह्येष यज्ञ इति यस्मिन्नहनि अ संस्थितो यज्ञस्तस्मिन् पत्नी
संयाजांतं दृश्यते। कथं हल्वर्थेन संस्था निर्दिश्यते यस्मा दिमानाहानि संतिष्ठंते न बर्हिः प्रहरति अ संस्थितो हि राम
संस्थितान्यहानि तस्मादेषु पत्नीसंयाजांतता। संस्थितिश्चोत्तमे हनि। अपि च यश्चाहः सु पत्नीसंयाजांततातिसंस्था १७

दृश्यते कीर्त्यमानात्तस्मादसंख्यायाः पत्नीसंयाजांततायाश्च सामानाधिकरण्यं। असंख्यां च प्रायुत्तमात्
दृष्ट्वा प्रायुत्तमादेव पत्नीसंयाजांततामध्यवस्यामः॥ अनुवादो वा दीक्षायथानकं संस्थापनस्य। तत्रादः पत्नीय
वर्तयति। नैतदस्ति प्रायुत्तमात्पत्नीसंयाजांतत नास्त्यादिति। किं तर्हि। सर्वेषाम विशेषात्। यदुक्तेषु पत्नीसंय
जांततातेथसंख्याद्दृश्यते। तस्मादसंख्यायाः प्रायुत्तमादर्कोपत्नीसंयाजांततानि पश्याम इति। नैतदेवं विधिमूल
दर्शनेनानुमानमाणमूलं। अनो मृगतृष्णारूपमेतद्दर्शनं। यदपि संख्याहेतुरिति तदपि न स्यात्। उक्तं हि। श्रुतिर्
श्रुत्याद्दृष्टवत्कल्पादिति। ननु सामानाधिकरण्यं असंख्यापत्नीसंयाजांततयोः। पत्नीसंयाजांतता सर्वेषामङ्गाङ्ग
इत्यनगम्यते। असंख्या पुनर्न्यायेन प्रायुत्तमादर्को यदेतदसंस्थितो हि तर्हि यत्र सति अर्थवाद एष पत्नीसंयाज
नतास्तु तदर्थः॥ तथा ह्यसंस्थितो यत्र श्चिरेण संस्थाप्यत इत्युसालोच्यते। यस्मा श्चिरेण संस्थाप्यते तस्मादव
लुप्यन्तां पत्नीसंयाजांतान्यहानि नं वंति तिसंतिष्ठमाने थेवाहः। श्वैश्वस्तु असंख्या वचनं पत्नीसंयाजांततायाः संस
पसंस्थावंतिष्ठितान्यहानि। अवभृथादय एषां शेषः पदार्थाः क्रियन्ते यथा दीक्षान्तो च नवचनं न तु संख्या

पनेस्यार्थवादः एवमेतद्दृष्टम्। वरुणप्राघासमां वा एषोमिथीयते यो दिह्निनोऽहोरात्रे वै वरुणप्राघासा यदिवा
संस्थापयेरन्तुन्मुक्तो वरुणप्राघासा। मीमांसायां नक्तं संस्थाप्यो वरुणप्राघासाम्बोन्मुच्यते आत्मनो हिंसापाइतिअनु
ज्ञातः सवरुणप्राघासान्नताववह्निपाऽनुचमे तत्रैव स्थिताहि दीक्षान्मोचनार्थः ... येनोच्यते वरुणप्राघासाम्यामे
वानिर्मुच्यत इति वरुणवो नियमास्तदनो विरज्यते मानालोच्येषवादो भवति एवमपि हापि वरुण संस्थामालोच्यासंस्थि
तवचनं भवतीति॥ ॥स्यालीनारम्य विधानात् लिंगविरोधात्॥ बाध्याद्यालक्षो विपरिवर्तते। भवेद्यापाग्नेमात्
पत्नीसंयाजान्तानसारम्भ्यान्नमेहेरेषा विधीयते। कथं तर्हि सामान्ये न पत्नीसंयाजान्तान्यहानि भवन्तीति तत्रोतलिं
गविरोधो भवति। पुनर्न्यायेन प्राप्तिरिति। पत्नीसंयाजान्तान्यहानि संतिष्ठंते शंयुनैव तदुक्तं भवति शिष्टमवलुप्यतइ
तिसंतिष्ठंते नानुष्ठीयंत इतिकर्तव्यापारस्य परमतीतीति। तेषु सह क्रियमाणेषु हस्तवपर्येऽकस्मिं स्थितापदार्थे वस्थाप्य।
वरूपमपरस्याङ्गः पदार्थान्नुष्ठातव्याः तत्रानियमप्राप्ते पत्नीसंयाजान्ते स्थाप्य मितिनियमप्यते तत्स्थावस्थान राम
सैतत्प्रयोजनं कथमहरेतरस्य पदार्थानुष्ठानेन यौगपद्यमनुष्ठेयं तेनेति। एतद्धि दृष्टमवकार्ये यस्मिन्नेतद १८

स्थान१

ष्टं न शक्यं कल्पयितुं तथा दृष्टे। तत्र न पत्नीसंयाजांत तावन्न्यांतस्य प्रयोजनं न विद्यते तस्मात्पाणीसाला
संयाजांत इति न्यायेन प्राप्ते लिंगदर्शनमसंस्थितो हि तत्र हि यज्ञ इति॥ ॥अभ्यासः सामिधेनीनां प्राथम्यात्स्था
न धर्मः स्यात्॥ स्तोदर्शपूर्णमासयोः तत्र सामिधेनीः प्रकृत्योच्यते त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाहेति तत्रैषोऽर्थः
सांशयिकः किमस्य धर्म एष यच्च तत्र स्थानं प्रथमो वा जितो त्रिरभ्यसितव्या। उत स्थानधर्मो योऽन्योऽपि प्रथमम् उच्यते स त्रिरभ्य
सितव्येति कुतः संशयः। उभयथोपपत्तेः यथा धर्माभिसंबंधः क्रियते या सा प्रथमम् उच्चरितानां सामिधेनीनां प्रथमम् उच्चरिता सा त्रि
रभ्यसितव्येति ततः प्रथमाया जातायास्तत्रैव धर्मः अथैव विज्ञायते प्राथम्यसंयुक्तं त्रिरनूयादिति ततो वचनस्य स्थानधर्मता
किं तावत्प्राप्तं जातौ धर्म इति। कुतः प्राथम्यस्य वचनात् सर्वं घात्वर्थेऽभ्यासे न कथमवगम्यते स्त्रीलिंगनिर्देशात् व्यक्तिवि
शेषो हि स्त्रीनाम यदि तद्विशेषणं प्राथम्यं स्यात्ततो लिंगविशेषणनिर्देशो न कल्पते। सापि स्त्री ज्यासेन संमन्यते अ अ३
थ प्रथमम् अन्वाहेत्युच्यते त्रिरभ्यसितव्यम् इति ततो व्यक्तिविशेषेणाविवक्षते तत्र स्त्रीलिंगविशेषणनिर्देशो नोपपद्यते। अपि
च वाक्यभेदः प्रसज्येत प्रथमम् उक्ते त्रिरभ्यसितव्यं प्रथमम् उक्तायां त्रिरभ्यसितव्येति मत्वा हे पुनः प्राथम्यलक्षितायाः

भ॰न॰ वो धर्मः उच्यते। तत्रैकार्थविधानेनैव भवेद्वाक्यभेदः। अपि च श्रुत्या प्राथम्येन स्त्रीसंबंधस्तेन वाक्येनाभ्यासः तस्माद्द्वि
१९ धर्मीय च तत्र स्थाप्य वा वाजा निरभ्यासितव्येति एवं प्राप्ते ब्रूमः। यायं सामी चेनीनां प्रथमायास्त्रिरभ्यास उच्यते स प्रथमत्व
न निमित्तो धर्मः। नत्रैः कस्याश्चिज्जातिनिमित्तः। कुतः। नहि तत्स्नेपि ऋग्वेदे प्रथमानामकाविदग्विधत्या त्रिरभ्यस्य
तत्र च प्राथम्यम् लक्षणार्थं स्यात् इतरस्मिन्नपि द्विश्रुतिर्न लक्षणा। श्रुतिश्च ज्यायसी लक्षणायाः। तस्मादस्मत्पक्षः। अथ
यदुक्तं स्त्रीलिंगसंबंधात् तस्मात् लक्षणैव श्रुतिर्वाक्येन न विनियते स्त्रीलिंगोपपत्तिः। अत्रोच्यते। गुणवचनानां हि शब्दाना श्रुति ५
माश्रयतो लिंगवचनानि भवंतीत्यविशेष्यमाणायामपि व्यक्तौ यद्द्रव्यं प्राप्तं लिंगं तदाश्रयभूतं गुणस्य भवतीत्यविधि
त्सितेपि तस्मिन् लिंगविशेषे निर्देशोनुवादभूतो भवत्येव। यथा शुक्लः पुमान् शुक्ला स्त्री शुक्लं नपुंसकं शुक्ल एकः शुक्लौ
द्वौ शुक्ला बहव इति शुक्लां चाटीमानयेति यद्यपि चाटीानयनं विधीयते शुक्लत्वसंबंधमात्रं विधित्सितं भवति न तत्र लिंग
न विशेषणं क्रियते तथाप्यनुवादभूतः स्त्रीलिंगनिर्देशो भवत्येव शुक्लामानयेति। अनुवादभूतत्वाच्च न कश्चिद्वाक्य राम
भेदो भविष्यति। एवं च सति यद्यपि प्राथम्यस्य स्त्रीलिंगसंबंधः श्रौतस्तथापि प्राथम्यस्यैवाभ्यासेन संबंधो न लिंगस्य यद्य १९

न३

लिंगस्यैतेनसंबंधोऽभिधीयतेप्राथम्यस्यानुवादताकल्प्येतप्राथम्यस्यसंबंधेधर्मिविशीयमानेवाक्यंभिद्ये
तअपिचनैवाचविवक्षितंप्रातिपदिकविशेषणंस्त्रीशब्दः स्त्रियांयत्प्रातिपदिकंवर्त्तततेष्टाबादयइति॥ अवि ते २
शेषणेसपदान्तरेणसंबंधोभवतियथाराजपुरुषोगच्छतीतियदातुप्राथम्यस्याभ्यासेनसंबंधः तत्रप्राप्तमनूद्य
तस्त्रीत्वंयानिसामिधेनीषुवचनानि वचनाः स्त्रीलिंगवचनश्छब्दः तत्रयत्प्रथमंवचनंतस्याभ्यसूर्त्रगुणवचनानां
वाच्यानामाश्रयतोलिंगवचनानिभवंतीत्यविशेषितायामष्टत्वंस्त्रीलिंगंतद्विष्यतीतियत्प्रथमवचनंतत्त्रिरा
हेतिस्त्रीवसामस्रसामिधेनीतस्मात्त्रिः प्रथमामन्वाहेतिप्राप्तस्यलिप्सानुवादः त्रिः प्रथमामन्वाहत्रिरुत्तमांतांपंचद
शसंपद्यंतइतिपंचदशानांसामिधेनीनांसंपत्तयेत्रिर्वचनंन्यूनमानंपरिपूरणीयात्कृतोभवतिनर्थ्यनयवस्यापरि
पूर्णवसमिधनवतीनर्थवयवः तस्मात्प्राप्तानुवादोलिंगसंख्याप्राथम्यस्यधर्मीनर्थ॥ उपांशुयाजोपपानवदा
वर्तेतारंभणीया॥ स्तोदर्शपूर्णमासौदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतितत्रारंभणीयेष्टिः समाम्नाता॥ अ
ग्नावैष्णवमेकादशकपालंनिर्वपेत्सरस्वत्यैचरुंसरस्वतेद्वादशकपालमग्नयेभगिनेष्टाकपालंनिर्वपेद्

भा॰न॰ ४० कामयेतान्वारः सामिति नित्यवदेके भगिनमामनंति। आरतिश्च दर्शपूर्णमासयोः श्रूयते। यावज्जीवं द
र्शपूर्णमासाभ्यां यजेतेति। तत्रेष्ट्यावृत्तौ संदेहः। किमारंभणीयाप्यावर्त्ततेन तिष्ठिं प्राप्ते। आवर्त्ततेति।
सकृदेव कर्त्तव्येति। कुतः एवं प्रयोगवचनोनुगृहीतो भविष्यति। प्रयाजवदधर्यागस्तु। प्रयाजा आवर्त्तन्ते। एव
मंगभूता आरंभणीयाप्यावर्त्तेत॥ सकृद्वारंभसंयोगात् एकः पुनरारंभो यावज्जीवप्रयोगात्॥ वाशब्दः पक्षं व्या
वर्त्तयति। नैतदस्ति यदुक्तमारंभणीयावर्त्ततेति सकृदेव कर्त्तव्या। कुतः आरंभसंयोगात्। दर्शपूर्णमासयो
रारंभणे संयुज्यते। साधारणश्च सर्वेषां प्रयोगाणामारंभः कथं अग्नीनाधाय सर्वः संकल्पयति पर्वणि पर्वणि म
या दर्शपूर्णमासौ कर्त्तव्याविति तदध्यवसायाद दर्शपूर्णमासौ कर्त्तव्यावित्यारंभणीया क्रियते एष एवास्यारंभोऽय
दध्यवसायो नाम तत्र साधारणं सर्वेषां प्रयोगाणां यावज्जीवप्रयोगात् अथापि प्रथमं प्रवर्त्तनमारंभस्तथापि प्रथ
मप्रवृत्तेन सर्वप्रयोगाः कृता भवंति। तस्मात्सकृदारंभणीया कर्त्तव्येति॥ ॥ एवंना॥ इष्ट्यावृत्तौ प्रयाजवदावर्त्तेत। राम
रंभणीया। यस्तु प्रथमः पदार्थस्त्वारंभ इति। तत्रैष संन्यायः किं दर्शपूर्णमासयोरारभ्यमाणयोरारंभणीयाप्रय ४०

मपदार्थसम्बंधं करोति। उत पुरुषस्यारभमाणस्य प्रथमं दर्शपूर्णमासयोः प्रवर्त्तमानस्यारंभणीयाक
त्रीरमारंभणयोग्यं करोतीति। किंवा दर्शपूर्णमासयोः प्रकरणात्तयोरारंभे स्यात्। पुरुषसंबंधे च फलं कल्प
यितव्यं भवेत्॥ तस्माद्दर्शपूर्णमासारंभे एवं चेदारंभमेव दिष्ठ्यादन्नौ भत्वारंभं स्यात्॥ यथाप्रयोगाद्
त्रैप्रयाजाः सदर्शारंभसंयोगात् एकः पुनरारंभोऽर्थाद्यावज्जीवप्रयोगात्। स च बाधितुमर्हति कुतः पुरुषारंभ
संयोगात्। पुरुषदर्शपूर्णमासावारभमाणे विधीयते कुतः निर्वपेदिति स्मृत्या कर्त्तृसंबंधः क्रियते तत्र पु
रुषप्रयत्नवचनं विवक्षितत्वादार्थं भवति। इतरथा पदार्थमात्रे विधिः लिसितकर्त्तुः प्रयत्नमविवक्षितं स्यात्। प्र
योगवचनप्रामाण्यमेवानुघते। यत्रकर्त्तृसंबंधे फलं कल्पयिता व्यंतन्नकल्पयिष्यते कृतारंभणीयाकः पुरुषः
प्रयोगवचनेन गृहीष्यते। एवं वेदेऽस्मिन्नेवारंभे कृतारंभणीयाके कृते पुरुषे तत्प्रयोगाद्यावज्जीवं प्रयोगे कृता
रंभणीयाकः पुरुषो भवति। प्रथमं दर्शपूर्णमासौ रभमाणः कृतारंभणीयाको जातः द्वितीयादिष्वपि प्रयोगेषु द
र्शपूर्णमासावारभमाणः कृतारंभणीयाको जात इति योग्य एव भविष्यति। अथोच्यते। समाने हनि त्वारभ

मी॰न॰ ५१ मानइतिभवति। नचद्वितीयादिषु प्रयोगेषु समाने हनिहुत्तारं भणीयाकोसाविति। अत्रोच्यते द्वितीयादि
ष्वपि प्रयोगेषु समानएवाहनि दर्शपूर्णमासावारभ्यमानौ सो हुत्तारं भणीयाको जगतश्री योग्यएवमवि
ष्यति॥ अर्थाभिधानसंयोगान्मंत्रेषु शेषभावः स्यात्तत्राचोदितमप्राप्तं चोदिताभिधानात्॥ स्तौ दर्शपूर्णमा
सौ तत्र निर्वापमंत्रः। देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति। तत्रैवा
र्थः संशयितः। किंसवितृश्चि पूषशब्दानामविद्यतौ ऊह उतानूह इति। ततएतन्नावगम्यते तत्कर्मणि समवे
तमर्थमेते शब्दा अभिदधति। उतासमवेतमिति। यदि समवेतमूह इष्यते अथासमवेतमविहिताः प्रयोक्तंते
तदुभयमपि संदेहपरीक्ष्यते। किंतावन्नः प्रतिभाति तत्र समवेतमभिवदंतीति। कुतः एतद्धि मंत्रपदानां दृष्टंप्र
योजनं यत्समवेतमर्थं प्रकाशयंतीति। तत्रासमवेतार्थप्रकाशनेन किंचिदपि दृष्टं प्रयोजनं। समवेताना
नुपकाशने दृष्टमस्ति। तद्यदि समवेताभिधायिन एते शब्दास्ततः प्रयोजनवंतः। कथंपुनः समवेताभिधा राम
यिनः। यदिनामसवित्रादयः शब्दा अग्न्यादीनांवाचकानवेयुः। यदिवासवित्रादयो देवताविशेषादग्न्य २१

पूर्णमासयोः स्युक्तमंत्रपदानामदृष्टार्थतामाभूदित्यन्यतरदध्यवसीयते। मांत्रवर्णिकी देवताविधिः
सवित्रादयोवाग्न्याद्यो अग्न्यादीनांवाचकामेवपुंस्त्वस्तस्माद्दृष्टबलादन्यतरदध्यवसेयं। अत्राह। नन्वन्येपु
तु मिलत्वाव यव भूताः सवित्रादयोग्न्यादीनांवचनात्अपिसंतोग्न्यादिभिः प्रकाशितायादेवतायानर्हंति विदध
